# hanumatsahasranAmastotram

# હનુમત્સહસ્રનામસ્તોત્રમ્

## Document Information

Text title : hanumatsahasranAmastotra (From Rudrayamala tantra)

File name : hanumatsahasranAmastotrarudrayAmala.itx

Category : sahasranAma, hanumaana, hanuman

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran psaeaswaran at gmail

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Source : Rudrayamala tantra

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : September 14, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2021

*sanskritdocuments.org*

# હનુમત્સહસ્રનામસ્તોત્રમ્

રુદ્રયામલતઃ

કૈલાસશિખરે રમ્યે દેવદેવં મહેશ્વરમ્ ।
ધ્યાનોપરતમાસીનં નન્દિભૃઙ્ગિગણૈર્વૃતમ્ ॥ ૧॥

ધ્યાનાન્તે ચ પ્રસન્નાસ્યમેકાન્તે સમુપસ્થિતમ્ ।
દૃષ્ટ્વા શમ્ભું તદા દેવી પપ્રચ્છ કમલાનના ॥ ૨॥

દેવ્યુવાચ
શ‍ૃણુ દેવ પ્રવક્ષ્યામિ સંશયોઽસ્તિ મહાન્મમ ।
રુદ્રૈકાદશમાખ્યાતં પુરાહં ન ચ વેદ્મિ તમ્ ॥ ૩॥

કથયસ્વ મહાપ્રાજ્ઞ સર્વતો નિર્ણયં શુભમ્ ।
સમારાધયતો લોકે ભુક્તિમુક્તિફલં ભવેત્ ॥ ૪॥

મન્ત્રં યન્ત્રં તથા તન્નિર્ણયં ચ વિધિપૂજનમ્ ।
તત્સર્વં બ્રૂહિ મે નાથ કૃતાર્થા ચ ભવામ્યહમ્ ॥ ૫॥

ઈશ્વર ઉવાચ
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ ગોપ્યં સર્વાગમે સદા ।
સર્વસ્વં મમ લોકાનાં નૃણાં સ્વર્ગાપવર્ગદમ્ ॥ ૬॥

દશ વિષ્ણુર્દ્વાદશાર્કાસ્તે ચૈકાદશ સંસ્મૃતાઃ ।
રુદ્રઃ પરમચણ્ડશ્ચ લોકેઽસ્મિન્ભુક્તિમુક્તિદઃ ॥ ૭॥

હનુમાન્સ મહાદેવઃ કાલકાલઃ સદાશિવઃ ।
ઇહૈવ ભુક્તિકૈવલ્યમુક્તિદઃ સર્વકામદઃ ॥ ૮॥

ચિદ્રૂપી ચ જગદ્રૂપસ્તથારૂપવિરાડભૂત્ ।
રાવણસ્ય વધાર્થાય રામસ્ય ચ હિતાય ચ ॥ ૯॥

અઞ્જનીગર્ભસમ્ભૂતો વાયુરૂપી સનાતનઃ ।

યસ્ય સ્મરણમાત્રેણ સર્વવિઘ્નં વિનશ્યતિ ॥ ૧૦॥

મન્ત્રં તસ્ય પ્રવક્ષ્યામિ કામદં સુરદુર્લભમ્ ।
નિત્યં પરતરં લોકે દેવદૈત્યેષુ દુર્લભમ્ ॥ ૧૧॥

પ્રણવં પૂર્વમુદ્ધૃત્ય કામરાજં તતો વદેત્ ।
ૐ નમો ભગવતે હનુમતેઽપિ તતો વદેત્ ॥ ૧૨॥

તતો વૈશ્વાનરો માયામન્ત્રરાજમિમં પ્રિયે ।
એવં બહુતરા મન્ત્રાઃ સર્વશાસ્ત્રેષુ ગોપિતાઃ ॥ ૧૩॥

ૐ ક્લીં નમો ભગવતે હનુમતે સ્વાહા
યેન વિજ્ઞાતમાત્રેણ ત્રૈલોક્યં વશમાનયેત્ ।
વહ્નિં શીતઙ્કુરોત્યેવ વાતં ચ સ્થિરતાં નયેત્ ॥ ૧૪॥

વિઘ્નં ચ નાશયત્યાશુ દાસવત્સ્યાજ્જગત્ત્રયમ્ ।
ધ્યાનં તસ્ય પ્રવક્ષ્યામિ હનુર્યેન પ્રસીદતિ ॥ ૧૫॥

ધ્યાનમ્ -
પ્રદીપ્તં સ્વર્ણવર્ણાભં બાલાર્કારુણલોચનમ્ ।
સ્વર્ણમેરુવિશાલાઙ્ગં શતસૂર્યસમપ્રભમ્ ॥ ૧૬॥

રક્તામ્બરં ધરાસીનં સુગ્રીવાદિયુતં તથા ।
ગોષ્પદીકૃતવારીશં મશકીકૃતરાક્ષસમ્ ॥ ૧૭॥

પુચ્છવન્તં કપીશં તં મહારુદ્રં ભયઙ્કરમ્ ।
જ્ઞાનમુદ્રાલસદ્બાહું સર્વાલઙ્કારભૂષિતમ્ ॥ ૧૮॥

ધ્યાનસ્ય ધારણાદેવ વિઘ્નાન્મુક્તઃ સદા નરઃ ।
ત્રિષુ લોકેષુ વિખ્યાતઃ સર્વત્ર વિજયી ભવેત્ ॥ ૧૯॥

નામ્નાં તસ્ય સહસ્રં તુ કથયિષ્યામિ તે શૃ‍ણુ ।
યસ્ય સ્મરણમાત્રેણ વાદી મૂકો ભવેદ્ધ્રુવમ્ ॥ ૨૦॥

સ્તમ્ભનં પરસૈન્યાનાં મારણાય ચ વૈરિણામ્ ।
દારયેચ્છાકિનીઃ શીઘ્રં ડાકિનીભૂતપ્રેતકાન્ ॥ ૨૧॥

હરણં રોગશત્રૂણાં કારણં સર્વકર્મણામ્ ।
તારણં સર્વવિઘ્નાનાં મોહનં સર્વયોષિતામ્ ॥ ૨૨॥

ધારણં સર્વયોગાનાં વારણં શીઘ્રમાપદામ્ ॥ ૨૩॥

ૐ અસ્ય શ્રીહનુમતઃ સહસ્રનામસ્તોત્રમન્ત્રસ્ય સદાશિવ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીહનુમાન્ દેવતા । ૐ ક્લીં ઇતિ બીજમ્ ।
નમ ઇતિ કીલકમ્ । સ્વાહેતિ શક્તિઃ ।
સમસ્તપુરુષાર્થસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

ૐઓઙ્કારનમોરૂપમોંનમોરૂપપાલકઃ ।
ઓઙ્કારમયોઙ્કારકૃદોઙ્કારાત્મા સનાતનઃ ॥ ૨૪॥

બ્રહ્મબ્રહ્મમયો બ્રહ્મજ્ઞાની બ્રહ્મસ્વરૂપવિત્ ।
કપીશઃ કપિનાથશ્ચ કપિનાથસુપાલકઃ ॥ ૨૫॥

કપિનાથપ્રિયઃ કાલઃ કપિનાથસ્ય ઘાતકઃ ।
કપિનાથશોકહર્તા કપિભર્તા કપીશ્વરઃ ॥ ૨૬॥

કપિજીવનદાતા ચ કપિમૂર્તિઃ કપિર્ભૃતઃ ।
કાલાત્મા કાલરૂપી ચ કાલકાલસ્તુ કાલભુક્ ॥ ૨૭॥

કાલજ્ઞાની કાલકર્તા કાલહાનિઃ કલાનિધિઃ ।
કલાનિધિપ્રિયઃ કર્તા કલાનિધિસમપ્રભઃ ॥ ૨૮॥

કલાપી ચ કલાપાતા કીશત્રાતા કિશાં પતિઃ ।
કમલાપતિપ્રિયઃ કાકસ્વરઘ્નઃ કુલપાલકઃ ॥ ૨૯॥

કુલભર્તા કુલત્રાતા કુલાચારપરાયણઃ ।
કાશ્યપાહ્લાદકઃ કાકધ્વંસી કર્મકૃતાં પતિઃ ॥ ૩૦॥

કૃષ્ણઃ કૃષ્ણસ્તુતિઃ કૃષ્ણકૃષ્ણરૂપો મહાત્મવાન્ ।
કૃષ્ણવેત્તા કૃષ્ણભર્તા કપીશઃ ક્રોધવાન્ કપિઃ ॥ ૩૧॥

કાલરાત્રિઃ કુબેરશ્ચ કુબેરવનપાલકઃ ।
કુબેરધનદાતા ચ કૌસલ્યાનન્દજીવનઃ ॥ ૩૨॥

કોસલેશપ્રિયઃ કેતુઃ કપાલી કામપાલકઃ ।
કારુણ્યઃ કરુણારૂપઃ કરુણાનિધિવિગ્રહઃ ॥ ૩૩॥

કારુણ્યકર્તા દાતા ચ કપિઃ સાધ્યઃ કૃતાન્તકઃ ।
કૂર્મઃ કૂર્મપતિઃ કૂર્મભર્તા કૂર્મસ્ય પ્રેમવાન્ ॥ ૩૪॥

કુક્કુટઃ કુક્કુટાહ્વાનઃ કુઞ્જરઃ કમલાનનઃ ।

કુઞ્જરઃ કલભઃ કેકિનાદજિત્કલ્પજીવનઃ ॥ ૩૫॥

કલ્પાન્તવાસી કલ્પાન્તદાતા કલ્પવિબોધકઃ ।
કલભઃ કલહસ્તશ્ચ કમ્પઃ કમ્પપતિસ્તથા ॥ ૩૬॥

કર્મફલપ્રદઃ કર્મા કમનીયઃ કલાપવાન્ ।
કમલાસનબન્ધશ્ચ-કમ્પઃ-કમલાસનપૂજકઃ ॥ ૩૭॥

કમલાસનસેવી ચ કમલાસનમાનિતઃ ।
કમલાસનપ્રિયઃ કમ્બુઃ કમ્બુકણ્ઠોઽપિ કામધુક્ ॥ ૩૮॥

કિઞ્જલ્કરૂપી કિઞ્જલ્કઃ કિઞ્જલ્કાવનિવાસકઃ ।
ખગનાથપ્રિયઃ ખડ્ગી ખગનાથપ્રહારકઃ ॥ ૩૯॥

ખગનાથસુપૂજ્યશ્ચ ખગનાથપ્રબોધકઃ ।
ખગનાથવરેણ્યશ્ચ ખરધ્વંસી ખરાન્તકઃ ॥ ૪૦॥

ખરારિપ્રિયબન્ધુશ્ચ ખરારિજીવનઃ સદા ।
ખડ્ગહસ્તઃ ખડ્ગધનઃ ખડ્ગહાની ચ ખડ્ગપઃ ॥ ૪૧॥

ખઞ્જરીટપ્રિયઃ ખઞ્જઃ ખેચરાત્મા ખરારિજિત્ ॥ ૪૨॥

ખઞ્જરીટપતિઃ પૂજ્યઃ ખઞ્જરીટપચઞ્ચલઃ ।
ખદ્યોતબન્ધુઃ ખદ્યોતઃ ખદ્યોતનપ્રિયઃ સદા ॥ ૪૩॥

ગરુત્માન્ ગરુડો ગોપ્યો ગરુત્મદર્પહારકઃ ।
ગર્વિષ્ઠો ગર્વહર્તા ચ ગર્વહા ગર્વનાશકઃ ॥ ૪૪॥

ગર્વો ગુણપ્રિયો ગાણો ગુણસેવી ગુણાન્વિતઃ ।
ગુણત્રાતા ગુણરતો ગુણવન્તપ્રિયો ગુણી ॥ ૪૫॥

ગણેશો ગણપાતી ચ ગણરૂપો ગણપ્રિયઃ ।
ગમ્ભીરોઽથ ગુણાકારો ગરિમા ગરિમપ્રદઃ ॥ ૪૬॥

ગણરક્ષો ગણહરો ગણદો ગણસેવિતઃ ।
ગવાંશો ગવયત્રાતા ગર્જિતશ્ચ ગણાધિપઃ ॥ ૪૭॥

ગન્ધમાદનહર્તા ચ ગન્ધમાદનપૂજકઃ ।
ગન્ધમાદનસેવી ચ ગન્ધમાદનરૂપધૃક્ ॥ ૪૮॥

ગુરુર્ગુરુપ્રિયો ગૌરો ગુરુસેવ્યો ગુરૂન્નતઃ ।

ગુરુગીતાપરો ગીતો ગીતવિદ્યાગુરુર્ગુરુઃ ॥ ૪૯॥

ગીતાપ્રિયો ગીતરાતો ગીતજ્ઞો ગીતવાનપિ ।
ગાયત્ર્યા જાપકો ગોષ્ઠો ગોષ્ઠદેવોઽથ ગોષ્ઠપઃ ॥ ૫૦॥

ગોષ્પદીકૃતવારીશો ગોવિન્દો ગોપબન્ધકઃ ।
ગોવર્ધનધરો ગર્વો ગોવર્ધનપ્રપૂજકઃ ॥ ૫૧॥

ગન્ધર્વો ગન્ધર્વરતો ગન્ધર્વાનન્દનન્દિતઃ ।
ગન્ધો ગદાધરો ગુપ્તો ગદાઢ્યો ગુહ્યકેશ્વરઃ ॥

ગિરિજાપૂજકો ગીશ્ચ ગીર્વાણો ગોષ્પતિસ્તથા ।
ગિરિર્ગિરિપ્રિયો ગર્ભો ગર્ભપો ગર્ભવાસકઃ ॥ ૫૩॥

ગભસ્તિગ્રાસકો ગ્રાસો ગ્રાસદાતા ગ્રહેશ્વરઃ ।
ગ્રહો ગ્રહેશાનો ગ્રાહો ગ્રહદોષવિનાશનઃ ॥ ૫૪॥

ગ્રહારૂઢો ગ્રહપતિર્ગર્હણો ગ્રહણાધિપઃ ।
ગોલી ગવ્યો ગવેશશ્ચ ગવાક્ષમોક્ષદાયકઃ ॥ ૫૫॥

ગણો ગમ્યો ગણદાતા ગરુડધ્વજવલ્લભઃ ।
ગેહો ગેહપ્રદો ગમ્યો ગીતાગાનપરાયણઃ ॥ ૫૬॥

ગહ્વરો ગહ્વરત્રાણો ગર્ગો ગર્ગેશ્વરપ્રદઃ ।
ગર્ગપ્રિયો ગર્ગરતો ગૌતમો ગૌતમપ્રદઃ ॥ ૫૭॥

ગઙ્ગાસ્નાયી ગયાનાથો ગયાપિણ્ડપ્રદાયકઃ ।
ગૌતમીતીર્થચારી ચ ગૌતમીતીર્થપૂજકઃ ॥ ૫૮॥

ગણેન્દ્રોઽથ ગણત્રાતા ગ્રન્થદો ગ્રન્થકારકઃ ।
ઘનાઙ્ગો ઘાતકો ઘોરો ઘોરરૂપી ઘનપ્રદઃ ॥ ૫૯॥

ઘોરદંષ્ટ્રો ઘોરનખો ઘોરઘાતી ઘનેતરઃ ।
ઘોરરાક્ષસઘાતી ચ ઘોરરૂપ્યઘદર્પહા ॥ ૬૦॥

ઘર્મો ઘર્મપ્રદશ્ચૈવ ઘર્મરૂપી ઘનાઘનઃ ।
ઘનધ્વનિરતો ઘણ્ટાવાદ્યપ્રિયઘૃણાકરઃ ॥ ૬૧॥

ઘોઘો ઘનસ્વનો ઘૂર્ણો ઘૂર્ણિતોઽપિ ઘનાલયઃ ।
ઙકારો ઙપ્રદો ઙાન્તશ્ચન્દ્રિકામોદમોદકઃ ॥ ૬૨॥

ચન્દ્રરૂપશ્ચન્દ્રવન્દ્યશ્ચન્દ્રાત્મા ચન્દ્રપૂજકઃ ।
ચન્દ્રપ્રેમશ્ચન્દ્રબિમ્બશ્ચામરપ્રિયશ્ચઞ્ચલઃ ॥ ૬૩॥

ચન્દ્રવક્ત્રશ્ચકોરાક્ષશ્ચન્દ્રનેત્રશ્ચતુર્ભુજઃ ।
ચઞ્ચલાત્મા ચરશ્ચર્મી ચલત્ખઞ્જનલોચનઃ ॥ ૬૪॥

ચિદ્રૂપશ્ચિત્રપાનશ્ચ ચલચ્ચિત્તાચિતાર્ચિતઃ ।
ચિદાનન્દશ્ચિતશ્ચૈત્રશ્ચન્દ્રવંશસ્ય પાલકઃ ॥ ૬૫॥

છત્રશ્છત્રપ્રદશ્છત્રી છત્રરૂપી છિદાચ્છદઃ ।
છલહા છલદશ્છિન્નશ્છિન્નઘાતી ક્ષપાકરઃ ॥ ૬૬॥

છદ્મરૂપી છદ્મહારી છલી છલતરુસ્તથા ।
છાયાકરદ્યુતિશ્છન્દશ્છન્દવિદ્યાવિનોદકઃ ॥ ૬૭॥

છિન્નારાતિશ્છિન્નપાપશ્છન્દવારણવાહકઃ ।
છન્દશ્છ(ક્ષ)ત્રહનશ્છિ(ક્ષિ)પ્રશ્છ(ક્ષ)-
વનશ્છન્મદશ્છ(ક્ષ)મી ॥ ૬૮॥

ક્ષમાગારઃ ક્ષમાબન્ધઃ ક્ષપાપતિપ્રપૂજકઃ ।
છલઘાતી છિદ્રહારી છિદ્રાન્વેષણપાલકઃ ॥ ૬૯॥

જનો જનાર્દનો જેતા જિતારિર્જિતસઙ્ગરઃ ।
જિતમૃત્યુર્જરાતીતો જનાર્દનપ્રિયો જયઃ ॥ ૭૦॥

જયદો જયકર્તા ચ જયપાતો જયપ્રિયઃ ।
જિતેન્દ્રિયો જિતારાતિર્જિતેન્દ્રિયપ્રિયો જયી ॥ ૭૧॥

જગદાનન્દદાતા ચ જગદાનન્દકારકઃ ।
જગદ્વન્દ્યો જગજ્જીવો જગતામુપકારકઃ ॥ ૭૨॥

જગદ્ધાતા જગદ્ધારી જગદ્બીજો જગત્પિતા ।
જગત્પતિપ્રિયો જિષ્ણુર્જિષ્ણુજિજ્જિષ્ણુરક્ષકઃ ॥ ૭૩॥

જિષ્ણુવન્દ્યો જિષ્ણુપૂજ્યો જિષ્ણુમૂર્તિવિભૂષિતઃ ।
જિષ્ણુપ્રિયો જિષ્ણુરતો જિષ્ણુલોકાભિવાસકઃ ॥

જયો જયપ્રદો જાયો જાયકો જયજાડ્યહા ।
જયપ્રિયો જનાનન્દો જનદો જનજીવનઃ ॥ ૭૫॥

જયાનન્દો જપાપુષ્પવલ્લભો જયપૂજકઃ ।

જાડ્યહર્તા જાડ્યદાતા જાડ્યકર્તા જડપ્રિયઃ ॥ ૭૬॥

જગન્નેતા જગન્નાથો જગદીશો જનેશ્વરઃ ।
જગન્મઙ્ગલદો જીવો જગત્યવનપાવનઃ ॥ ૭૭॥

જગત્ત્રાણો જગત્પ્રાણો જાનકીપતિવત્સલઃ ।
જાનકીપતિપૂજ્યશ્ચ જાનકીપતિસેવકઃ ॥ ૭૮॥

જાનકીશોકહારી ચ જાનકીદુઃખભઞ્જનઃ ।
યજુર્વેદો યજુર્વક્તા યજુઃપાઠપ્રિયો વ્રતી ॥ ૭૯॥

જિષ્ણુર્જિષ્ણુકૃતો જિષ્ણુધાતા જિષ્ણુવિનાશનઃ ।
જિષ્ણુહા જિષ્ણુપાતી તુ જિષ્ણુરાક્ષસઘાતકઃ ॥ ૮૦॥

જાતીનામગ્રગણ્યશ્ચ જાતીનાં વરદાયકઃ ।
ઝુઁઝુરો ઝૂઝુરો ઝૂર્ઝનવરો ઝઞ્ઝાનિષેવિતઃ ॥ ૮૧॥

ઝિલ્લીરવસ્વરો ઞન્તો ઞવણો ઞનતો ઞદઃ ।
ટકારાદિષ્ટકારાન્તાષ્ટવર્ણાષ્ટપ્રપૂજકઃ ॥ ૮૨॥

ટિટ્ટિભષ્ટિટ્ટિભસ્તષ્ટિષ્ટિટ્ટિભપ્રિયવત્સલઃ ।
ઠકારવર્ણનિલયષ્ઠકારવર્ણવાસિતઃ ॥ ૮૩॥

ઠકારવીરભરિતષ્ઠકારપ્રિયદર્શકઃ ।
ડાકિનીનિરતો ડઙ્કો ડઙ્કિનીપ્રાણહારકઃ ॥ ૮૪॥

ડાકિનીવરદાતા ચ ડાકિનીભયનાશનઃ ।
ડિણ્ડિમધ્વનિકર્તા ચ ડિમ્ભો ડિમ્ભાતરેતરઃ ॥ ૮૫॥

ડક્કાઢક્કાનવો ઢક્કાવાદ્યષ્ઢક્કામહોત્સવઃ ।
ણાન્ત્યો ણાન્તો ણવર્ણશ્ચ ણસેવ્યો ણપ્રપૂજકઃ ॥ ૮૬॥

તન્ત્રી તન્ત્રપ્રિયસ્તલ્પસ્તન્ત્રજિત્તન્ત્રવાહકઃ ।
તન્ત્રપૂજ્યસ્તન્ત્રરતસ્તન્ત્રવિદ્યાવિશારદઃ ॥ ૮૭॥

તન્ત્રયન્ત્રજયી તન્ત્રધારકસ્તન્ત્રવાહકઃ ।
તન્ત્રવેત્તા તન્ત્રકર્તા તન્ત્રયન્ત્રવરપ્રદઃ ॥ ૮૮॥

તન્ત્રદસ્તન્ત્રદાતા ચ તન્ત્રપસ્તન્ત્રદાયકઃ ।
તત્ત્વદાતા ચ તત્ત્વજ્ઞસ્તત્ત્વસ્તત્ત્વપ્રકાશકઃ ॥ ૮૯॥

તન્દ્રા ચ તપનસ્તલ્પતલાતલનિવાસકઃ ।
તપસ્તપઃપ્રિયસ્તાપત્રયતાપી તપઃપતિઃ ॥ ૯૦॥

તપસ્વી ચ તપોજ્ઞાતા તપતામુપકારકઃ ।
તપસ્તપોત્રપસ્તાપી તાપદસ્તાપહારકઃ ॥ ૯૧॥

તપઃસિદ્ધિસ્તપોઋદ્ધિસ્તપોનિધિસ્તપઃપ્રભુઃ ।
તીર્થસ્તીર્થરતસ્તીવ્રસ્તીર્થવાસી તુ તીર્થદઃ ॥ ૯૨॥

તીર્થપસ્તીર્થકૃત્તીર્થસ્વામી તીર્થવિરોધકઃ ।
તીર્થસેવી તીર્થપતિસ્તીર્થવ્રતપરાયણઃ ॥ ૯૩॥

ત્રિદોષહા ત્રિનેત્રશ્ચ ત્રિનેત્રપ્રિયબાલકઃ ।
ત્રિનેત્રપ્રિયદાસશ્ચ ત્રિનેત્રપ્રિયપૂજકઃ ॥ ૯૪॥

ત્રિવિક્રમસ્ત્રિપાદૂર્ધ્વસ્તરણિસ્તારણિસ્તમઃ ।
તમોરૂપી તમોધ્વંસી તમસ્તિમિરઘાતકઃ ॥ ૯૫॥

તમોધૃક્તમસસ્તપ્તતારણિસ્તમસોઽન્તકઃ ।
તમોહૃત્તમકૃત્તામ્રસ્તામ્રૌષધિગુણપ્રદઃ ॥

તૈજસસ્તેજસાં મૂર્તિસ્તેજસઃ પ્રતિપાલકઃ ।
તરુણસ્તર્કવિજ્ઞાતા તર્કશાસ્ત્રવિશારદઃ ॥ ૯૭॥

તિમિઙ્ગિલસ્તત્ત્વકર્તા તત્ત્વદાતા વ તત્ત્વવિત્ ।
તત્ત્વદર્શી તત્ત્વગામી તત્ત્વભુક્તત્ત્વવાહનઃ ॥ ૯૮॥

ત્રિદિવસ્ત્રિદિવેશશ્ચ ત્રિકાલશ્ચ તમિસ્રહા ।
સ્થાણુઃ સ્થાણુપ્રિયઃ સ્થાણુઃ સર્વતોઽપિ ચ વાસકઃ ॥ ૯૯॥

દયાસિન્ધુર્દયારૂપો દયાનિધિર્દયાપરઃ ।
દયામૂર્તિર્દયાદાતા દયાદાનપરાયણઃ ॥ ૧૦૦॥

દેવેશો દેવદો દેવો દેવરાજાધિપાલકઃ ।
દીનબન્ધુર્દીનદાતા દીનોદ્ધરણદિવ્યદૃક્ ॥ ૧૦૧॥

દિવ્યદેહો દિવ્યરૂપો દિવ્યાસનનિવાસકઃ ।
દીર્ઘકેશો દીર્ઘપુચ્છો દીર્ઘસૂત્રોઽપિ દીર્ઘભુક્ ॥ ૧૦૨॥

દીર્ઘદર્શી દૂરદર્શી દીર્ઘબાહુસ્તુ દીર્ઘપઃ ।
દાનવારિર્દરિદ્રારિર્દૈત્યારિર્દસ્યુભઞ્જનઃ ॥ ૧૦૩॥

દંષ્ટ્રી દણ્ડી દણ્ડધરો દણ્ડપો દણ્ડદાયકઃ ।
દામોદરપ્રિયો દત્તાત્રેયપૂજનતત્પરઃ ॥ ૧૦૪॥

દર્વીદલહુતપ્રીતો દદ્રુરોગવિનાશકઃ ।
ધર્મો ધર્મી ધર્મચારી ધર્મશાસ્ત્રપરાયણઃ ॥ ૧૦૫॥

ધર્માત્મા ધર્મનેતા ચ ધર્મદૃગ્ધર્મધારકઃ ।
ધર્મધ્વજો ધર્મમૂર્તિર્ધર્મરાજસ્ય ત્રાસકઃ ॥ ૧૦૬॥

ધાતા ધ્યેયો ધનો ધન્યો ધનદો ધનપો ધની ।
ધનદત્રાણકર્તા ચ ધનપપ્રતિપાલકઃ ॥ ૧૦૭॥

ધરણીધરપ્રિયો ધન્વી ધનવદ્ધનધારકઃ ।
ધન્વીશવત્સલો ધીરો ધાતૃમોદપ્રદાયકઃ ॥ ૧૦૮॥

ધાત્રૈશ્વર્યપ્રદાતા ચ ધાત્રીશપ્રતિપૂજકઃ ।
ધાત્રાત્મા ચ ધરાનાથો ધરાનાથપ્રબોધકઃ ॥ ૧૦૯॥

ધર્મિષ્ઠો ધર્મકેતુશ્ચ ધવલો ધવલપ્રિયઃ ।
ધવલાચલવાસી ચ ધેનુદો ધેનુપો ધની ॥ ૧૧૦॥

ધ્વનિરૂપો ધ્વનિપ્રાણો ધ્વનિધર્મપ્રબોધકઃ ।
ધર્માધ્યક્ષો ધ્વજો ધૂમ્રો ધાતુરોધિવિરોધકઃ ॥ ૧૧૧॥

નારાયણો નરો નેતા નદીશો નરવાનરઃ ।
નન્દીસઙ્ક્રમણો નાટ્યો નાટ્યવેત્તા નટપ્રિયઃ ॥ ૧૧૨॥

નારાયણાત્મકો નન્દી નન્દિશૃઙ્ગિગણાધિપઃ ।
નન્દિકેશ્વરવર્મા ચ નન્દિકેશ્વરપૂજકઃ ॥ ૧૧૩॥

નરસિંહો નટો નીપો નખયુદ્ધવિશારદઃ ।
નખાયુધો નલો નીલો નલનીલપ્રમોદકઃ ॥ ૧૧૪॥

નવદ્વારપુરાધારો નવદ્વારપુરાતનઃ ।
નરનારયણસ્તુત્યો નખનાથો નગેશ્વરઃ ॥ ૧૧૫॥

નખદંષ્ટ્રાયુધો નિત્યો નિરાકારો નિરઞ્જનઃ ।
નિષ્કલઙ્કો નિરવદ્યો નિર્મલો નિર્મમો નગઃ ॥ ૧૧૬॥

નગરગ્રામપાલશ્ચ નિરન્તો નગરાધિપઃ ।

નાગકન્યાભયધ્વંસી નાગારિપ્રિયનાગરઃ ॥ ૧૧૭॥

પીતામ્બરઃ પદ્મનાભઃ પુણ્ડરીકાક્ષપાવનઃ ।
પદ્માક્ષઃ પદ્મવક્ત્રશ્ચ પદ્માસનપ્રપૂજકઃ ॥ ૧૧૮॥

પદ્મમાલી પદ્મપરઃ પદ્મપૂજનતત્પરઃ ।
પદ્મપાણિઃ પદ્મપાદઃ પુણ્ડરીકાક્ષસેવનઃ ॥ ૧૧૯॥

પાવનઃ પવનાત્મા ચ પવનાત્મજઃ પાપહા ।
પરઃ પરતરઃ પદ્મઃ પરમઃ પરમાત્મકઃ ॥ ૧૨૦॥

પીતામ્બરઃ પ્રિયઃ પ્રેમ પ્રેમદઃ પ્રેમપાલકઃ ।
પ્રૌઢઃ પ્રૌઢપરઃ પ્રેતદોષહા પ્રેતનાશકઃ ॥ ૧૨૧॥

પ્રભઞ્જનાન્વયઃ પઞ્ચ પઞ્ચાક્ષરમનુપ્રિયઃ ।
પન્નગારિઃ પ્રતાપી ચ પ્રપન્નઃ પરદોષહા ॥ ૧૨૨॥

પરાભિચારશમનઃ પરસૈન્યવિનાશકઃ ।
પ્રતિવાદિમુખસ્તમ્ભઃ પુરાધારઃ પુરારિનુત્ ॥ ૧૨૩॥

પરાજિતઃ પરમ્બ્રહ્મ પરાત્પરપરાત્પરઃ ।
પાતાલગઃ પુરાણશ્ચ પુરાતનઃ પ્લવઙ્ગમઃ ॥ ૧૨૪॥

પુરાણપુરુષઃ પૂજ્યઃ પુરુષાર્થપ્રપૂરકઃ ।
પ્લવગેશઃ પલાશારિઃ પૃથુકઃ પૃથિવીપતિઃ ॥ ૧૨૫॥

પુણ્યશીલઃ પુણ્યરાશિઃ પુણ્યાત્મા પુણ્યપાલકઃ ।
પુણ્યકીર્તિઃ પુણ્યગીતિઃ પ્રાણદઃ પ્રાણપોષકઃ ॥ ૧૨૬॥

પ્રવીણશ્ચ પ્રસન્નશ્ચ પાર્થધ્વજનિવાસકઃ ।
પિઙ્ગકેશઃ પિઙ્ગરોમા પ્રણવઃ પિઙ્ગલપ્રણઃ ॥ ૧૨૭॥

પરાશરઃ પાપહર્તા પિપ્પલાશ્રયસિદ્ધિદઃ ।
પુણ્યશ્લોકઃ પુરાતીતઃ પ્રથમઃ પુરુષઃ પુમાન્ ॥ ૧૨૮॥

પુરાધારશ્ચ પ્રત્યક્ષઃ પરમેષ્ઠી પિતામહઃ ।
ફુલ્લારવિન્દવદનઃ ફુલ્લોત્કમલલોચનઃ ॥ ૧૨૯॥

ફૂત્કારઃ ફૂત્કરઃ ફૂશ્ચ ફૂદમન્ત્રપરાયણઃ ।
સ્ફટિકાદ્રિનિવાસી ચ ફુલ્લેન્દીવરલોચનઃ ॥ ૧૩૦॥

વાયુરૂપી વાયુસુતો વાય્વાત્મા વામનાશકઃ ।
વનો વનચરો બાલો બાલત્રાતા તુ બાલકઃ ॥ ૧૩૧॥

વિશ્વનાથશ્ચ વિશ્વં ચ વિશ્વાત્મા વિશ્વપાલકઃ ।
વિશ્વધાતા વિશ્વકર્તા વિશ્વવેત્તા વિશામ્પતિઃ ॥ ૧૩૨॥

વિમલો વિમલજ્ઞાનો વિમલાનન્દદાયકઃ ।
વિમલોત્પલવક્ત્રશ્ચ વિમલાત્મા વિલાસકૃત્ ॥ ૧૩૩॥

બિન્દુમાધવપૂજ્યશ્ચ બિન્દુમાધવસેવકઃ ।
બીજોઽથ વીર્યદો બીજહારી બીજપ્રદો વિભુઃ ॥ ૧૩૪॥

વિજયો બીજકર્તા ચ વિભૂતિર્ભૂતિદાયકઃ ।
વિશ્વવન્દ્યો વિશ્વગમ્યો વિશ્વહર્તા વિરાટ્તનુઃ ॥ ૧૩૫॥

બુલકારહતારાતિર્વસુદેવો વનપ્રદઃ ।
બ્રહ્મપુચ્છો બ્રહ્મપરો વાનરો વાનરેશ્વરઃ ॥ ૧૩૬॥

બલિબન્ધનકૃદ્વિશ્વતેજા વિશ્વપ્રતિષ્ઠિતઃ ।
વિભોક્તા ચ વાયુદેવો વીરવીરો વસુન્ધરઃ ॥ ૧૩૭॥

વનમાલી વનધ્વંસી વારુણો વૈષ્ણવો બલી ।
વિભીષણપ્રિયો વિષ્ણુસેવી વાયુગવિર્વિદુઃ ॥ ૧૩૮॥

વિપન્નો વાયુવંશ્યશ્ચ વેદવેદાઙ્ગપારગઃ ।
બૃહત્તનુર્બૃહત્પાદો બૃહત્કાયો બૃહદ્યશાઃ ॥ ૧૩૯॥

બૃહન્નાસો બૃહદ્બાહુર્બૃહન્મૂર્તિર્બૃહત્સ્તુતિઃ ।
બૃહદ્ધનુર્બૃહજ્જઙ્ઘો બૃહત્કાયો બૃહત્કરઃ ॥ ૧૪૦॥

બૃહદ્ગતિર્બૃહત્પુચ્છો બૃહલ્લોકફલપ્રદઃ ।
બૃહત્સેવ્યો બૃહચ્છક્તિર્બૃહદ્વિદ્યાવિશારદઃ ॥ ૧૪૧॥

બૃહલ્લોકરતો વિદ્યા વિદ્યાદાતા વિદિક્પતિઃ ।
વિગ્રહો વિગ્રહરતો વ્યાધિનાશી ચ વ્યાધિદઃ ॥ ૧૪૨॥

વિશિષ્ટો બલદાતા ચ વિઘ્નનાશો વિનાયકઃ ।
વરાહો વસુધાનાથો ભગવાન્ ભવભઞ્જનઃ ॥ ૧૪૩॥

ભાગ્યદો ભયકર્તા ચ ભાગો ભૃગુપતિપ્રિયઃ ।
ભવ્યો ભક્તો ભરદ્વાજો ભયાઙ્ઘ્રિર્ભયનાશનઃ ॥ ૧૪૪॥

માધવો મધુરાનાથો મેઘનાદો મહામુનિઃ ।
માયાપતિર્મનસ્વી ચ માયાતીતો મનોત્સુકઃ ॥ ૧૪૫॥

મૈનાકવન્દિતામોદો મનોવેગી મહેશ્વરઃ ।
માયાનિર્જિતરક્ષાશ્ચ માયાનિર્જિતવિષ્ટપઃ ॥ ૧૪૬॥

માયાશ્રયશ્ચ નિલયો માયાવિધ્વંસકો મયઃ ।
મનોયમપરો યામ્યો યમદુઃખનિવારણઃ ॥ ૧૪૭॥

યમુનાતીરવાસી ચ યમુનાતીર્થચારણઃ ।
રામો રામપ્રિયો રમ્યો રાઘવો રઘુનન્દનઃ ॥ ૧૪૮॥

રામપ્રપૂજકો રુદ્રો રુદ્રસેવી રમાપતિઃ ।
રાવણારી રમાનાથવત્સલો રઘુપુઙ્ગવઃ ॥ ૧૪૯॥

રક્ષોઘ્નો રામદૂતશ્ચ રામેષ્ટો રાક્ષસાન્તકઃ ।
રામભક્તો રામરૂપો રાજરાજો રણોત્સુકઃ ॥ ૧૫૦॥

લઙ્કાવિધ્વંસકો લઙ્કાપતિઘાતી લતાપ્રિયઃ ।
લક્ષ્મીનાથપ્રિયો લક્ષ્મીનારાયણાત્મપાલકઃ ॥ ૧૫૧॥

પ્લવગાબ્ધિહેલકશ્ચ લઙ્કેશગૃહભઞ્જનઃ ।
બ્રહ્મસ્વરૂપી બ્રહ્માત્મા બ્રહ્મજ્ઞો બ્રહ્મપાલકઃ ॥ ૧૫૨॥

બ્રહ્મવાદી ચ વિક્ષેત્રં વિશ્વબીજં ચ વિશ્વદૃક્ ।
વિશ્વમ્ભરો વિશ્વમૂર્તિર્વિશ્વાકારોઽથ વિશ્વધૃક્ ॥ ૧૫૩॥

વિશ્વાત્મા વિશ્વસેવ્યોઽથ વિશ્વો વિશ્વેશ્વરો વિભુઃ ।
શુક્લઃ શુક્રપ્રદઃ શુક્રઃ શુક્રાત્મા ચ શુભપ્રદઃ ॥ ૧૫૪॥

શર્વરીપતિશૂરશ્ચ શૂરશ્ચાથ શ્રુતિશ્રવાઃ ।
શાકમ્ભરીશક્તિધરઃ શત્રુઘ્નઃ શરણપ્રદઃ ॥ ૧૫૫॥

શઙ્કરઃ શાન્તિદઃ શાન્તઃ શિવઃ શૂલી શિવાર્ચિતઃ ।
શ્રીરામરૂપઃ શ્રીવાસઃ શ્રીપદઃ શ્રીકરઃ શુચિઃ ॥ ૧૫૬॥

શ્રીશઃ શ્રીદઃ શ્રીકરશ્ચ શ્રીકાન્તપ્રિયઃ શ્રીનિધિઃ ।
ષોડશસ્વરસંયુક્તઃ ષોડશાત્મા પ્રિયઙ્કરઃ ॥ ૧૫૭॥

ષડઙ્ગસ્તોત્રનિરતઃ ષડાનનપ્રપૂજકઃ ।

ષટ્શાસ્ત્રવેત્તા ષડ્બાહુઃ ષટ્સ્વરૂપઃ ષડૂર્મિપઃ ॥ ૧૫૮॥

સનાતનઃ સત્યરૂપઃ સત્યલોકપ્રબોધકઃ ।
સત્યાત્મા સત્યદાતા ચ સત્યવ્રતપરાયણઃ ॥ ૧૫૯॥

સૌમ્યઃ સૌમ્યપ્રદઃ સૌમ્યદૃક્સૌમ્યઃ સૌમ્યપાલકઃ ।
સુગ્રીવાદિયુતઃ સર્વસંસારભયનાશનઃ ॥ ૧૬૦॥

સૂત્રાત્મા સૂક્ષ્મસન્ધ્યશ્ચ સ્થૂલઃ સર્વગતિઃ પુમાન્ ।
સુરભિઃ સાગરઃ સેતુઃ સત્યઃ સત્યપરાક્રમઃ ॥ ૧૬૧॥

સત્યગર્ભઃ સત્યસેતુઃ સિદ્ધિસ્તુ સત્યગોચરઃ ।
સત્યવાદી સુકર્મા ચ સદાનન્દૈક ઈશ્વરઃ ॥ ૧૬૨॥

સિદ્ધિઃ સાધ્યઃ સુસિદ્ધશ્ચ સઙ્કલ્પઃ સિદ્ધિહેતુકઃ ।
સપ્તપાતાલચરણઃ સપ્તર્ષિગણવન્દિતઃ ॥ ૧૬૩॥

સપ્તાબ્ધિલઙ્ઘનો વીરઃ સપ્તદ્વીપોરુમણ્ડલઃ ।
સપ્તાઙ્ગરાજ્યસુખદઃ સપ્તમાતૃનિષેવિતઃ ॥ ૧૬૪॥

સપ્તચ્છન્દોનિધિઃ સપ્ત સપ્તપાતાલસંશ્રયઃ ।
સઙ્કર્ષણઃ સહસ્રાસ્યઃ સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૧૬૫॥

હનુમાન્ હર્ષદાતા ચ હરો હરિહરીશ્વરઃ ।
ક્ષુદ્રરાક્ષસઘાતી ચ ક્ષુદ્ભતક્ષાન્તિદાયકઃ ॥ ૧૬૬॥

અનાદીશો હ્યનન્તશ્ચ આનન્દોઽધ્યાત્મબોધકઃ ।
ઇન્દ્ર ઈશોત્તમશ્ચૈવ ઉન્મત્તજન ઋદ્ધિદઃ ॥ ૧૬૭॥

ૠવર્ણો ૡલુપદોપેત ઐશ્વર્યં ઔષધીપ્રિયઃ ।
ઔષધશ્ચાંશુમાંશ્ચૈવ અકારઃ સર્વકારણઃ ॥ ૧૬૮॥

ઇત્યેતદ્રામદૂતસ્ય નામ્નાં ચૈવ સહસ્રકમ્ ।
એકકાલં દ્વિકાલં વા ત્રિકાલં શ્રદ્ધયાન્વિતઃ ॥ ૧૬૯॥

પઠનાત્પાઠનાદ્વાપિ સર્વા સિદ્ધિર્ભવેત્પ્રિયે ।
મોક્ષાર્થી લભતે મોક્ષં કામાર્થી કામમાપ્નુયાત્ ॥ ૧૭૦॥

વિદ્યાર્થી લભતે વિદ્યાં વેદવ્યાકરણાદિકમ્ ।
ઇચ્છાકામાંસ્તુ કામાર્થી ધર્માર્થી ધર્મમક્ષયમ્ ॥ ૧૭૧॥

પુત્રાર્થી લભતે પુત્રં વરાયુસ્સહિતં પુમાન્ ।
ક્ષેત્રં ચ બહુસસ્યં સ્યાદ્ગાવશ્ચ બહુદુગ્ધદાઃ ॥ ૧૭૨॥

દુઃસ્વપ્નં ચ નૃભિર્દૃષ્ટં સુસ્વપ્નમુપજાયતે ।
દુઃખૌઘો નશ્યતે તસ્ય સમ્પત્તિર્વર્દ્ધતે ચિરમ્ ॥ ૧૭૩॥

ચતુર્વિધં વસ્તુ તસ્ય ભવત્યેવ ન સંશયઃ ।
અશ્વત્થમૂલે જપતાં નાસ્તિ વૈરિકૃતં ભયમ્ ॥ ૧૭૪॥

ત્રિકાલં પઠનાત્તસ્ય સિદ્ધિઃ સ્યાત્કરસંસ્થિતા ।
અર્ધરાત્રે રવૌ ધૃત્વા કણ્ઠદેશે નરઃ શુચિઃ ॥ ૧૭૫॥

દશાવર્તં પઠેન્મર્ત્યઃ સર્વાન્કામાનવાપ્નુયાત્ ।
ભૌમે નિશાન્તે ન્યગ્રોધમૂલે સ્થિત્વા વિચક્ષણઃ ॥ ૧૭૬॥

દશાવર્તં પઠેન્મર્ત્યઃ સાર્વભૌમઃ પ્રજાયતે ।
અર્કમૂલેઽર્કવારે તુ યો મધ્યાહ્ને શુચિર્જપેત્ ॥ ૧૭૭॥

ચિરાયુઃ સ સુખી પુત્રી વિજયી જાયતે ક્ષણાત્ ।
બ્રાહ્મે મુહૂર્તે ચોત્થાય પ્રત્યહં ચ પઠેન્નરઃ ॥ ૧૭૮॥

યં યં કામયતે કામં લભતે તં ન સંશયઃ ।
સઙ્ગ્રામે સન્નિવિષ્ટાનાં વૈરિવિદ્રાવણં પરમ્ ॥ ૧૭૯॥

ડાકિનીભૂતપ્રેતેષુ ગ્રહપીડાહરં તથા ।
જ્વરાપસ્મારશમનં યક્ષ્મપ્લીહાદિવારણમ્ ॥ ૧૮૦॥

સર્વસૌખ્યપ્રદં સ્તોત્રં સર્વસિદ્ધિપ્રદં તથા ।
સર્વાન્કામાનવાપ્નોતિ વાયુપુત્રપ્રસાદતઃ ॥ ૧૮૧॥

ઇતિ શ્રીરુદ્રયામલતઃ શ્રીહનુમત્સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*hanumatsahasranAmastotram*

pdf was typeset on June 13, 2021

Please send corrections to *sanskrit@cheerful.com*